# શ્રીજગન્મોહનાષ્ટકમ્

## Shri Jaganmohanashtakam

sanskritdocuments.org

May 13, 2018

Shri Jaganmohanashtakam

# શ્રીજગન્મોહનાષ્ટકમ્

## Sanskrit Document Information

Text title : jaganmohanAShTakam

File name : jaganmohanAShTakam.itx

Category : vishhnu, aShTaka, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# શ્રીજગન્મોહનાષ્ટકમ્

શ્રીવિશ્વનાથચક્રવર્તિવિરચિતં
ગુઞ્જાવલીવેષ્ટિતચિત્રપુષ્પચૂડાવલન્મઞ્જુલનવ્યપિચ્છમ્ ।
ગોરોચનાચારુતમાલપત્રં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૧॥

ભ્રૂવલ્ગનોન્માદિતગોપનારીકટાક્ષબાણાવલિવિદ્ધનેત્રમ્ ।
નાસાગ્રરાજન્મણિચારુમુક્તં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૨॥

આલોલવક્રાલકકાન્તિચુમ્બિગણ્ડસ્થલપ્રોન્નતચારહાસ્યમ્ ।
વામપ્રગણ્ડોચ્ચલકુણ્ડલાન્તં વન્દે જગન્મોહનભિષ્ટદેવમ્ ॥ ૩॥

બન્ધૂકબિમ્બદ્યુતિનિન્દિકુઞ્ચત્પ્રાન્તાધરભ્રાજિતવેણુવક્ત્રમ્ ।
કિઞ્ચિત્તિરશ્ચીનશિરોધિભાતં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૪॥

અકુણ્ઠરેખાત્રયરાજિકણ્ઠખેલત્સ્વરાલિશ્રુતિરાગરાજિમ્ ।
વક્ષઃસ્ફુરત્કૌસ્તુભમુન્નતાંસં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૫॥

આજાનુરાજદ્વલયાઙ્ગદાઞ્ચિસ્મરાર્ગલાકારસુવૃત્તબાહુમ્ ।
અનર્ઘમુક્તામણિપુષ્પમાલં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૬॥

શ્વાસૈજદશ્વત્થદલાભતુન્દમધ્યસ્થરોમાવલિરમ્યરેખમ્ ।
પીતામ્બરં મઞ્જુલકિઙ્કિણીકં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૭॥

વ્યત્યસ્તપાદં મણિનૂપુરાઢ્યં શ્યામં ત્રિભઙ્ગં સુરશાખિમૂલે ।
શ્રીરાધયા સાર્ધમુદારલીલં વન્દે જગન્મોહનમિષ્ટદેવમ્ ॥ ૮॥

શ્રીમજ્જગન્મોહનદેવમેતત્પદ્યાષ્ટકેન સ્મરતો જનસ્ય ।
પ્રેમા ભવેદ્યેન તદઙ્ઘ્રિસાક્ષાત્સેવામૃતેનૈવ નિમજ્જનં સ્યાત્ ॥ ૯॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તિવિરચિતં શ્રીજગન્મોહનાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Jaganmohanashtakam*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*